५ति हलायुधः ॥ जोँक इति भाषा ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ५४ अध्याये ।
"चूरवो द्विमुखाश्चैव सप्तैवेते पुरीषजाः ॥")

द्विमुखाहिः, पुं, (द्विमुखः अहिः सर्पः ।) सर्पविशेषः । मुँखिनी इति भाषा । तत्पर्य्यायः । अहीरलिः २ राजाहिः ३ राजसर्पः ४ द्विमुखः ५ सर्पभुक् ६ । इति हलायुधः ॥

द्विमुखोरगः, पुं, (द्विमुखः उरगः सर्पः ।) राजसर्पः । इति जटाधरः ॥

द्विमूर्द्धः, त्रि, (द्वौ मूर्द्धानौ यस्य । "द्वित्रिभ्यां ष मूर्द्धः ।" ५ । ४ । ११५ । इति ष ।) मस्तकद्वययुक्तः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ४ । ४१ ।
"बहुमूर्द्धा द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां रुधे ॥")

द्विरदः, पुं स्त्री, (द्वौ रदौ दन्तौ प्रधानतया यस्य । हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ७ । २६ । २७ ।
"क्षोभयन्तं तथा सेनां द्विरदं नलिनीमिव ।
धनञ्जयं भूतगणाः साधु साध्वित्यपूजयन् ॥")

द्विरदान्तकः, पुं, (द्विरदानां हस्तिनां अन्तकः ।) सिंहः । इति राजनिर्घण्टः ॥

द्विरशनं, क्ली, (द्विर्वारमशनं भोजनम् ।) वारद्वयभोजनम् । यथा,—
"मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां नित्यम् ।
अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति तिथ्यादितत्त्वम् ॥

द्विरसनः, पुं, (द्वे रसने जिह्वे यस्य ।) सर्पः । इति हारावली । १५ ॥

द्विरागमनं, क्ली, (द्विर्वारं विवाहात् परं आगमनं स्वामिगृहे इत्यर्थः ।) विवाहानन्तरं बध्वाः पितृगेहात् पतिगृहे पुनरागमनम् । यथा, नारायणपद्धतौ ।
"वृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्द्विरागमनं विदुः ॥"
तस्य शुभकालदिनादि यथा । दीपिकायाम् ।
"स्त्रीशुद्धालिघटाजसंयुतरवौ काले विशुद्धे भृगुं संत्यज्य प्रतिलोमगं शुभदिने यात्राप्रवेशोचिते ।
त्यक्त्वाहस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः कुर्य्यादेकपुरादिषु प्रतिभृगोर्नैच्छन्ति दोषं बुधाः॥
पैत्रागारे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धो न भवति यदा संमुखो वापि शुक्रः ।
मेषे कुम्भेऽलिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भद्रेऽहनि नववधूं वेशयेन्मन्दिरं स्वम् ॥
भर्त्तर्गोचरशोभने दिनपतौ नास्तं गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे ।
हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा
यानीता गुणशालिनी नववधूर्नित्योत्सवा मोदते ॥
एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नीयमानायाः पुरः शुक्रो न दुष्यति ॥"
तथा,—
"काश्यपेषु वशिष्ठेषु भृग्वादित्याङ्गिरःसु च ।
भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न दोषभाक् ॥"
श्रीपतिसंहितायां प्रचेताः ।
"पुष्यादित्यसमीरणादिति वसुश्रव्युत्तरारेवती-
तारानायकरोहिणीषु शुभदे मेषालिकुम्भे रवौ ।
वारे त्विज्यसितेन्दुवित्सु शुभदे तारे प्रशस्ते विधौ
कन्यामन्मथमीनतौलिग्गृगभे स्यादङ्गना-
द्व्यागमः ॥"
ज्योतिःसारसंग्रहे ।
"विवाहमासि प्रथमं बध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माद्यब्दं विचक्षणैः ॥"
कृत्यचिन्तामणौ ।
"श्वश्रूं हन्त्यष्टमे वर्षे श्वशुरञ्च दशाब्दिके ।
सम्प्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे ॥"
मत्स्यसूक्ते ।
"भुक्त्वा पितृगृहे कन्या भुङ्क्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥
निष्कर्षस्तु ।
"विवाहमासि प्रथममनागताया बध्वा अष्टमदशमद्वादशेतरवर्षे कालशुद्धौ वैशाखमार्गशीर्षफाल्गुनान्यतममासे रविशुद्धौ सोमबुधगुरुशुक्रान्यतमवारे चन्द्रतारानुकूले रोहिणीपुनर्व्वसुमृगशिरःपुष्योत्तरात्रयहस्तस्वातीधनिष्ठारेवतीषु विष्टिभिन्नकरणेषु निषिद्धेतरयोगेषु कन्यामिथुनतुलामीनलग्नेषु द्विरागमनम् । कस्यचिन्मते बुधवारोऽपि निषिद्धः ।
दक्षिणदिङ्मुखगमनं गमनमभिनवनारीणाम् ।
वयमपि धान्यादीनां न बुधो बुधवासरे कुर्य्यात् ॥"
इति सत्कृत्यमुक्तावली ॥

द्विरापः, पुं, (द्विर्द्विवारं मुखशुण्डाभ्यामित्यर्थः । आ सम्यक् पिबतीति । पा + कः ।) हस्ती । इति शब्दमाला ॥

द्विराषाढ़ः, पुं, (द्विः आषाढ़ः ।) मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वयम् । स च आषाढ़मलमासे भवति । यथा, ज्योतिषे ।
"मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
मिहिरश्च ।
"माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढ़ः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥"
इति मलमासतत्त्वम् ॥
अन्यच्च ।
"पौर्णमास्या द्वयं यत्र पूर्व्वाषाढ़ाद्वयं भवेत् ।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
इति गारुड़े ६० अध्यायः ॥

द्विरुक्तः, त्रि, (द्विर्द्विवारं यथा तथा उक्तः ।) द्विवारकथितः । यथा । द्विरुक्तयच्चादौ द्विः । इति मुग्धबोधलक्षणम् ॥

द्विरुक्तिः, स्त्री, (वच + क्तिन् । द्विर्द्विवारं उक्तिः ।) द्विवारकथनम् । इति संक्षिप्तसारः ॥

द्विरूढ़ा, स्त्री, (उह्यते इति । वह + कर्म्मणि क्तः । द्विः ऊढ़ा विवाहिता ।) द्विवारविवाहिता । तत्पर्य्यायः । दिधिषूः २ पुनर्भूः ३ । इति हेमचन्द्रः । ३ । १८६ ॥

द्विरूपः, पुं, (द्वौ रूपौ आकारौ यत्र ।) द्व्याकारशब्दादिः । यथा । द्विरूपकोषादिः । द्विवारग्रन्थावृत्तिः । यथा । द्विरूपचण्ड्यादिपाठः । रूपद्वययुक्ते, त्रि ॥

द्विरेफः, पुं स्त्री, (द्वौ रेफौ रकारवर्णौ यस्य भ्रमरनाम्नि ।) भ्रमरः । (यथा, कुमारे । ३ । २७ ।
"निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
वर्व्वरे, त्रि । इत्यमरः ॥

द्विवर्षा, स्त्री, (द्वौ वर्षौ वयःपरिमाणमस्याः । द्विवर्ष + आर्हीयष्ठक् तस्य लुक् च ।) द्विहायनी । द्विवर्षवयस्का गौः । इत्यमरः ।२।६।६८॥

द्विवर्षिका, स्त्री, (द्विवर्षेव । स्वार्थे कन् । टापि "प्रत्ययस्थादिति ।" ७ । ३ । ४४ । इति अत इत्वम् ।) द्विवर्षा गौः । इति हेमचन्द्रः ।४।३३८॥

द्विवर्षीणः, त्रि, (द्वौ वर्षौ वयःपरिमाणमस्य । द्विवर्ष + खः ।) द्विवार्षिकः । द्विवर्षवयस्कः । इति पाणिनीयव्याकरणम् ॥

द्विवार्षिकः, त्रि, (द्विवर्षे भवः । ठक् ।) द्विवर्षभवः । वत्सरद्वयजातः । इति व्याकरणम् ॥

द्विवाहिका, स्त्री, (द्वाभ्यां पार्श्वाभ्यां वाहयतीति । वह + णिच् + ण्वुल् । टापि अत इत्वम् ।) दोला । इति शब्दमाला ॥

द्विविदः, पुं, वानरविशेषः । इति हेमचन्द्रः ॥ (अयं हि नरकासुरस्य मित्रम् । यथा, विष्णुपुराणे । ५ । ३६ । २ ।
"नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्य्यो द्विविदो नाम वानरः ॥"
स तु बलरामेण हतः । यथा, तत्रैव ।५।३६।२०।
"ततो बलेन कोपेन मुष्टिना मूर्द्ध्नि ताड़ितः ।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥"
श्रीरामस्य सचिववानराणामन्यतमः । यथा, महाभारते । ३ । २७६ । २३ ।
"मैन्दश्च द्विविदश्चैव हनूमांश्चानिलात्मजः ।
जाम्बवानृक्षराजश्च सुग्रीवः सचिवाः स्मृताः ॥")
"समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः ।
ऐकाहिकज्वरं हन्ति तस्य नामानुकीर्त्तनात् ॥"
इति ज्योतिषम् ॥

द्विवेशरा, स्त्री, (द्वौ वेशौ गमनावस्थानरूपौ राति ददातीति । रा दाने + कः ।) लघुरथः । तत्पर्य्यायः । गन्त्री २ लघ्वी ३ । इति हारावली । १६२ ॥

द्विशः, [स्] व्य, (द्वि + "संख्यैकवचनाच्च वीप्सायाम् ।" ५ । ४ । ४३ । इति वीप्सायां शस् ।) द्वौ द्वौ । इति वीप्सार्थे चशस्प्रत्ययः ॥ (यथा, सुश्रुते । १ । ४१ ।
"द्विशो वा बहुशो वापि ज्ञात्वा दोषेऽवचारयेत् ॥")